दिनाङ्क :- 04.11.2025

प्रात: - 06:55

## प्रधानमन्त्री-ESTIC

प्रधानमंत्री नरेंद्रमोदी अकथयत् यत् देशः अधुना प्रौद्योगिक्याः न केवलं उपभोक्ता अपितु प्रौद्योगिकप्रगत्याः अग्रणिः अभवत् । सः प्रोक्तवान् यत् प्रोद्योगिक्यां देशस्य प्रगतिः द्रुतगत्या अग्रे वर्धते । प्रधानमंत्री नवदिल्ल्यां भारतमंडपम् इत्यत्र इमर्जिंग साइंस एंड टेक्नोलॉजी इनोवेशन कॉन्क्लेव 2025 इत्यस्य उद्घाटनानन्तरं एतत् वक्तव्यं प्रायच्छत्। प्रधानमंत्री अकथयत् यत् सर्वकारः देशे नवाचारस्य मॉडर्न-इकोसिस्टम इत्येतत् निर्मातुं सरलान्वेषणं केन्द्रितं करोति । सः एततदपि सबलं प्रत्यपादयत् यत् देशे विश्वस्य सफलतमः डिजिटल-पब्लिक-इंफ्रास्ट्रक्चर इति उपक्रमः निर्मितः अस्ति । प्रधानमंत्री देशे रिसर्च-डेवलपमेंट-इकोसिस्टम इत्येतस्य सुदृढीकरणम् उद्दिश्य एक-लक्ष-कोटि-रूप्यकानां रिसर्च-डेवलपमेंट-इनोवेशन-स्कीम-फंड इत्येतस्य अपि शुभारम्भं विहितवान् ।

## मेरा बूथ सबसे मज़बूत्

मेरा बूथ सबसे मज़बूत् इत्यस्य उपक्रमस्य अन्तर्गतं प्रधानमन्त्री नरेन्द्रमोदी अद्य बिहार राज्ये महिलाभिः सह संवादं करिष्यति। एकस्मिन् जनसंचार पटले श्रीमोदी चर्चायाः विषये उत्साहं प्रकटितवान्। असौ प्रोक्तवान् च यत् बिहार-विधानसभा-निर्वाचने भाजपेति दलस्य विजयं सुनिश्चेतुं महिलाः समर्पणभावेन योगदानं कुर्वन्ति इति।

## बिहार-राजनीतिः

बिहारे विधानसभानिर्वाचनस्य प्रथम-चरणस्य प्रचारः अद्य सायङ्काले समापनात् पूर्वं पूर्णगत्या प्रवर्तते। प्रमुख-प्रचारकाः, एन्. डी. ए. , महाघटबन्धन् इत्येतयोः प्रमुखयोः

सङ्घटनयोः वरिष्ठ-नेतारः च विभिन्नेषु निर्वाचनक्षेत्रेषु बहुविध-सार्वजनिक-सभाः आयोजयन्ति। अस्मिन् चरणे गुरुवासरे अष्टादश-मण्डलेषु एकविंशत्यधिकैकशतं निर्वाचनक्षेत्रेषु मतदानं भविष्यति । जनतादलस्य अध्यक्षः मुख्यमन्त्री च नितीशकुमारः भागलपुरनगरे निर्वाचनसमारोहं सम्बोधयन् प्रोक्तवान् यत्, तस्य नेतृत्वे बिहारराज्यं विकासस्य मार्गे प्रगतिं करोति। आर्. जे. डी.-दलस्य नेता तेजस्वी-प्रसाद-यादवः भोजपुरे निर्वाचनसमारोहं सम्बोधितवान् । बिहार-राज्ये राजनैतिकपरिवर्तनम् निश्चितम् अस्ति, अस्मिन् समये जनाः महाघटबन्धनं सत्तां प्रदातुं समुस्तुकाः सन्ति इति सः उदघोषयत्। एन्. डी. ए. पक्षतः, प्रधानमन्त्री नरेन्द्रमोदी, केन्द्रीय-गृहमन्त्री अमितशाहः, उत्तरप्रदेशस्य मुख्यमन्त्री योगी आदित्यनाथः , भाजपा-दलस्य प्रमुख-प्रचारकाः च अनेकाः जनसभाः सम्बोधयिष्यन्ति । उत्तरप्रदेशस्य मुख्यमन्त्री , बी. जे. पी.-दलस्य नेता च योगी आदित्यनाथवर्यः दरभङ्गा-नगरे जनसभां सम्बोधितवान्।

ईसीआई

भारतीय निर्वाचनायोगस्य वरिष्ठ-उप-निर्वाचनायुक्तः ज्ञानेश-भारती इत्येषः पश्चिमबङ्ग-राज्ये त्रयाणां सदस्यानां दलस्य नेतृत्वं करिष्यति। एतानि दलानि नवेम्बर मासस्य पंच दिनाङ्कात् अष्ट दिनाङ्कं यावत् बाङ्ग्लादेशस्य उत्तरवङ्गे कूचबिहारस्य, जलपाईगुडी-मण्डलस्य, अलिपुर्दुर्-मण्डलस्य च भ्रमणं करिष्यन्ति। प्रवासकाले पश्चिमवङ्गस्य मुख्य-निर्वाचन-अधिकारी मनोजकुमार-अग्रवालः निर्वाचन-आयोगस्य दलेन सह भविष्यति।

ऋतुविज्ञान विभाग

भारतीय ऋतुविज्ञान विभागेन अद्य जम्मू-कश्मीर, लद्दाख, हिमाचलप्रदेश, उत्तराखण्ड इत्येतेषु राज्येषु विद्युतेन सह मेघगर्जनस्य पूर्वानुमानं प्रकटितम्। तत्रैव, देहली-एन.सी.आर. इत्यत्र वायुगुणवत्ता अतीव दुर्बलश्रेण्यां वर्तते।